# .. vAsudevAShTakaM ..

## ॥ वासुदेवाष्टकं ॥

by Shri Narayanaguru

॥ अथ श्री वासुदेवाष्टकं ॥

श्रीवासुदेव सरसीरुहपाञ्चजन्यकौमोदकीभयनिवारणचक्रपाणे ।
श्रीवत्सवत्स सकलामयमूलनाशिन् श्रीभूपते हर हरे सकलामयं मे ॥ १॥
गोविन्द गोपसुत गोगणपाललोल गोपीजनाङ्गकमनीयनिजाङ्गसङ्ग ।
गोदेविवल्लभ महेश्वरमुख्यवन्द्य श्रीभूपते हर हरे सकलामयं मे ॥ २॥
नीलाळिकेश परिभूषितबर्हिबर्ह काळांबुदद्युतिकळायकळेबराभ ।
वीर स्वभक्तजनवत्सल नीरजाक्ष श्रीभूपते हर हरे सकलामयं मे ॥ ३॥
आनन्दरूप जनकानकपूर्वदुन्दुभ्यानन्दसागर सुधाकरसौकुमार्य ।
मानापमानसममानस राजहंस श्रीभूपते हर हरे सकलामयं मे ॥ ४॥
मञ्जीरमञ्जुमणिशिञ्जितपादपद्म कञ्जायताक्ष करुणाकर कञ्जनाभ ।
सञ्जीवनौषध सुधामय साधुरम्य श्रीभूपते हर हरे सकलामयं मे ॥ ५॥
कंसासुरद्विरद केसरिवीर ग़ोरवैराकरामयविरोधकराज शौरे ।
हंसादिरम्य सरसीरुहपादमूल श्रीभूपते हर हरे सकलामयं मे ॥ ६॥
संसारसङ्कटविशङ्कटकङ्कटाय सर्वार्थदाय सदयाय सनातनाय ।
सच्चिन्मयाय भवते सततं नमोस्तु श्रीभूपते हर हरे सकलामयं मे ॥ ७॥
भक्तप्रियाय भवशोकविनाशनाय मुक्तिप्रदाय मुनिवृन्दनिषेविताय ।
नक्तं दिवं भगवते नतिरस्मदीया श्रीभूपते हर हरे सकलामयं मे ॥ ८॥
॥ इति श्री नारायणगुरुविरचितं वासुदेवाष्टकं संपूर्णम् ॥

Shri Narayanaguru is believed to have chanted this stotram spontaneously after receiving a darsanam of Lord Krishna.

Encoded and proofread by P. P. Narayanaswami swami at math.mun.ca

Please send corrections to sanskrit@cheerful.com
Last updated November 19, 2010
http://sanskritdocuments.org